# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ४

श्रुत्वागस्त्येरितं वाक्यं रामो विस्मयमागतः ।
पूर्वमासीत्तु लङ्कायां रक्षसामिति सम्भवः ॥ १॥

ततः शिरः कम्पयित्वा त्रेताग्निसमविग्रहम् ।
अगस्त्यं तं मुहुर्दृष्ट्वा स्मयमानोऽभ्यभाषत ॥ २॥

भगवन्पूर्वमप्येषा लङ्कासीत्पिशिताशिनम् ।
इतीदं भवतः श्रुत्वा विस्मयो जनितो मम ॥ ३॥

पुलस्त्यवंशादुद्भूता राक्षसा इति नः श्रुतम् ।
इदानीमन्यतश्चापि सम्भवः कीर्तितस्त्वया ॥ ४॥

रावणात्कुम्भकर्णाच्च प्रहस्ताद्विकटादपि ।
रावणस्य च पुत्रेभ्यः किं नु ते बलवत्तराः ॥ ५॥

क एषां पूर्वको ब्रह्मन्किंनामा किन्तपोबलः ।
अपराधं च कं प्राप्य विष्णुना द्राविताः पुरा ॥ ६॥

एतद्विस्तरतः सर्वं कथयस्व ममानघ ।
कौतूहलं कृतं मह्यं नुद भानुर्यथा तमः ॥ ७॥

राघवस्य तु तच्छ्रुत्वा संस्कारालङ्कृतं वचः ।
ईषद्विस्मयमानस्तमगस्त्यः प्राह राघवम् ॥ ८॥

प्रजापतिः पुरा सृष्ट्वा अपः सलिलसम्भवः ।
तासां गोपायनो सत्त्वानसृजत्पद्मसम्भवः ॥ ९॥

ते सत्त्वाः सत्त्वकर्तारं विनीतवदुपस्थिताः ।
किं कुर्म इति भाषन्तः क्षुत्पिपासा भयार्दिताः ॥ १०॥

प्रजापतिस्तु तान्याह सत्त्वाहि प्रहसन्निव ।
आभाष्य वाचा यत्नेन रक्षध्वमिति मानदः ॥ ११॥

रक्षाम इति तत्रान्यैर्यक्षामेति तथापरैः ।
भुङ्क्षिताभुङ्क्षितैरुक्तस्ततस्तानाह भूतकृत् ॥ १२॥

रक्षाम इति यैरुक्तं राक्षसास्ते भवन्तु वः ।
यक्षाम इति यैरुक्तं ते वै यक्षा भवन्तु वः ॥ १३॥

तत्र हेतिः प्रहेतिश्च भ्रातरौ राक्षसर्षभौ ।
मधुकैटभसङ्काशौ बभूवतुररिन्दमौ ॥ १४॥

प्रहेतिर्धार्मिकस्तत्र न दारान्सोऽभिकाङ्क्षति ।
हेतिर्दारक्रियार्थं तु यत्नं परमथाकरोत् ॥ १५॥

स कालभगिनीं कन्यां भयां नाम भयावहाम् ।
उदावहदमेयात्मा स्वयमेव महामतिः ॥ १६॥

स तस्यां जनयामाअस हेती राक्षसपुङ्गव् ।
पुत्रं पुत्रवतां श्रेष्ठो विद्युत्केश इति श्रुतम् ॥ १७॥

विद्युत्केशो हेतिपुत्रः प्रदीप्ताग्निसमप्रभः ।
व्यवर्धत महातेजास्तोयमध्य इवाम्बुजम् ॥ १८॥

स यदा यौवनं भद्रमनुप्राप्तो निशाचरः ।
ततो दारक्रियां तस्य कर्तुं व्यवसितः पिता ॥ १९॥

सन्ध्यादुहितरं सोऽथ सन्ध्यातुल्यां प्रभावतः ।
वरयामास पुत्रार्थं हेती राक्षसपुङ्गवः ॥ २०॥

अवश्यमेव दातव्या परस्मै सेति सन्ध्यया ।
चिन्तयित्वा सुता दत्ता विद्युत्केशाय राघव ॥ २१॥

सन्ध्यायास्तनयां लब्ध्वा विद्युत्कृषो निशाचरः ।
रमते स तया सार्धं पौलोम्या मघवानिव ॥ २२॥

केन चित्त्वथ कालेन राम सालकटङ्कटा ।
विद्युत्केशाद्गर्भमाप घनराजिरिवार्णवात् ॥ २३॥

ततः सा राक्षसी गर्भं घनगर्भसमप्रभम् ।
प्रभूता मन्दरं गत्वा गङ्गा गर्भमिवाग्निजम् ॥ २४॥

तमुत्सृज्य तु सा गर्भं विद्युत्केशाद्रतार्थिनी ।
रेमे सा पतिना सार्धं विस्मृत्य सुतमात्मजम् ॥ २५॥

तयोत्सृष्टः स तु शिशुः शरदर्कसमद्युतिः ।

पाणिमास्ये समाधाय रुरोद घनराड् इव ॥ २६॥

अथोपरिष्टाद्गच्छन्वै वृषभस्थो हरः प्रभुः ।
अपश्यदुमया सार्धं रुदन्तं राक्षसात्मजम् ॥ २७॥

कारुण्यभावात्पार्वत्या भवस्त्रिपुरहा ततः ।
तं राक्षसात्मजं चक्रे मातुरेव वयः समम् ॥ २८॥

अमरं चैव तं कृत्वा महादेवोऽक्षयोऽव्ययः ।
पुरमाकाशगं प्रादात्पार्वत्याः प्रियकाम्यया ॥ २९॥

उमयापि वरो दत्तो राक्षसीनां नृपात्मज ।
सद्योपलभिर्गर्भस्य प्रसूतिः सद्य एव च ।
सद्य एव वयःप्राप्तिर्मातुरेव वयः समम् ॥ ३०॥

ततः सुकेशो वरदानगर्वितः
श्रियं प्रभोः प्राप्य हरस्य पार्श्वतः ।
चचार सर्वत्र महामतिः खगः
खगं पुरं प्राप्य पुरन्दरो यथा ॥ ३१॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com